Reg. No. : ...............................

Name : ..................................

**IV Semester B.A. Degree (CBCSS-OBE-Regular/Supplementary/ Improvement ) Examination, April 2023**
**(2019 Admission Onwards)**
**Core Course in Sanskrit**
**4B06SKT : SANDESAKAVYA AND CHAMPUKAVYA**

Time : 3 Hours                                                                 Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः देवनागरिलिपिरुपयोक्तव्या।*

I. वाक्येन वाक्याभ्यां वा उत्तरं लिखत। **(6×1=6)**

1) गन्तव्या ते वसतिरलका नाम-केषां वसतिः ?

2) नभसि के मेघस्य सहायाः संपत्स्यन्ते ?

3) गुह्यकस्तं ययाचे - कम् ?

4) रामं विना न खलु तिष्ठति जीवितं मे। कं इत्थं वदति ?

5) चम्पूकाव्यस्य लक्षणं किम् ?

6) त्रयाणामपि वल्कलादीन्युपाहरत् । का वल्कलानि उपाहरत् ?

II. क) सप्रकणं **त्रयाणाम्** आशयं विशदयत। **(3×2=6)**

7) मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।

8) के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः।

9) रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय।

10) आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।

P.T.O.



ख) सप्रकणं **त्रयाणाम्** आशयं विशदयत। **(3×2=6)**

11) लघ्वी बभूव रघुपुंगराजधानी।

12) प्राक्षाल्य चक्षुरिव वीक्षितमादरेण।

13) निद्रां निरस्य निषसाद निषादनाथः।

14) मातुर्वाक्येनावृतं मे गात्रं क्षात्रप्रक्रियां नार्हति।

III. क) **द्वे** व्याख्यात। **(2×3=6)**

15) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः
अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचैतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दुरसंस्थे।।

16) धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः ?
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे।
कामार्ता हि प्रकृतिकृपणाः चेतनाचेतनेनु।।

17) सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानास्थितहरशिरश्चन्द्रिकाधौतहर्म्या।।



ख) **द्वे** व्याख्यात। **(2×3=6)**

18) अलधुचलितझञ्झावातनिष्पेषदोषा
दशनिरिव कठोरः शीतलाम्भोदपङ्क्तौ।
अपहृतजनसौख्यान्मन्थराभेदवाक्या-
दपि भरतजनन्यां हन्त दौर्जन्यमासीत्।।

19) धर्मे निताघकिरणस्य करैः कठोरैः
कान्तारमध्यपदवीषु नखं पचासु।
त्वां वीक्ष्य संस्थुलपदां वनदेवताभि-
र्निन्दिष्यते नियतमेव निमेषहानिः।।

20) देवे स्थितेऽपि तनयं तव रामभद्रं
लोकः स्वयं भजतु नाम किमत्र चित्रम्।
चन्द्रं विना तदुपलम्भनहेतुभूतं
क्षीरोदमाश्रयति कं तृषितश्चकोरः।।

IV. **द्वे** उपन्यस्यत। **(2×5=10)**

21) कालिदासस्य प्रकृतिवर्णनापाटवम्।

**अथवा**

मेघस्य सञ्चारमार्गं संक्षिप्य विवृणुत।

22) रामस्य विवसनं श्रुत्वा दशरथस्य परिदेवनं विवृणुत।

**अथवा**

चम्पूरामायणे अयोध्याकाण्डस्य कथासंक्षेपं लिखत।

---